# Concept of Samanapratyayarabdha - vichitrapratyayarabdha

Vaidya Bhargav Bhide
Assistant Professor
Department of Dravyaguna
All India Institute of Ayurveda, New Delhi

# Points to be discussed

- Need
- Dravya karmukata
- Prabhava
- References from Samhita
- Utility

# Need

- Action of Dravya explained on the basis of Rasapanchaka
- Rules of Dravya action.
- Samana-Vichitra Pratyayarabdha – may be immerged as a need to explain the unexplained actions of a Dravya.

# प्रभाव (Prabhava)

- प्रभाव – प्र+भू
- प्रभवति सामर्थ्यविशिष्टं भवति द्रव्यमनेन इति प्रभावः ।
- रसवीर्यविपाकानां सामान्यं यत्र लक्ष्यते ।
  विशेषः कर्मणां चैव प्रभावस्तस्य स स्मृतः ॥ च.सू.26/67
- अमीमांस्यान्यचिन्त्यानि प्रसिद्धानि स्वभावतः ।
  आगमेनोपयोज्यानि भेषजानि विचक्षणैः ॥ सु.सू.40/19
- रसादि साम्ये यत्कर्मविशिष्टं तत् प्रभावजम् । अ.सं.सू.17/32
  अ.हृ.सू.9/26

# Prabhava and commentators

- सामान्यमिति तुल्यता । सामान्यं लक्ष्यत इत्यनेन रसादिकार्यत्वेन यन्नावधारयितुं शक्यते कार्यं तत् प्रभावकृतमिति सूचयति, अत एवोक्तं– प्रभावोऽचिन्त्य उच्यते; रसवीर्यविपाककार्यतयाऽचिन्त्य इत्यर्थः ।
- प्रभावश्चेह द्रव्यशक्तिरभिप्रेता, सा च द्रव्याणां सामान्यविशेषः दन्तीत्वादियुक्ता व्यक्तिरेव, यतः शक्तिर्हि स्वरूपमेव भावानां, नातिरिक्तं किञ्चिद्धर्मान्तरम् (चक्र.)

- प्रभावोऽचिन्त्यक्रियाहेतुर्वीर्यमेवेति शक्तिविशेष एव प्रभाव इत्यभिधीयते । सामान्यमिति तुल्यता; कर्मणां विशेषः न तुल्यतेत्यर्थः । एतेन द्रव्ययोर्द्वयो रसादिसाम्ये सत्यप्येकस्मिन् द्रव्ये जायते कार्यविशेषः इतरत्र तु न जायते, इत्यत्र यत् कारणतया वाच्यं तदेव प्रभाव इत्यर्थः । (शि.)

- यत्र द्रव्ये रस–वीर्य–विपाकानां सामान्यम् अन्यैः सह साम्यं लक्ष्यते, कर्मणां पुनर्विशेषः तस्य द्रव्यस्य स विशिष्टकर्महेतुः प्रभावः स्मृतः । (यो.)

- यत्र वस्तुनि रस–वीर्य–विपाकानां सामान्यं यस्य रसस्य यत् कार्यं, यस्य विपाकस्य यत् कार्यं, यस्य वीर्यस्य च यत् कार्यं तत्तस्य सामान्यं यत्र वस्तुनि लक्ष्यते, तत्र कर्मणां यो विशेषो लक्ष्यते स कर्मणां विशेषस्तस्य वस्तुनः प्रभावः स्मृतः ।
- ननु येन या क्रिया क्रियते तस्यां क्रियाया तस्य तद्वीर्यमुक्तं, ततो वीर्यमेव प्रभावः।
- तत्र यस्य यत् कर्म तत् तस्या चिन्तया निर्वक्तुं शक्यं, तद्व्यतिरिक्तः द्रव्यस्य यत् कर्मविशेषः सोऽचिन्त्यः, तत्तद्रस–पाक–गुण–कर्मभिः कार्यतया चिन्तयितुमशक्यः ततः प्रभावः शक्तिविशेष उच्यते । (ग.)

- वीर्यं शक्तिः, सा च पृथिव्यादीनां भूतानां यः सारभागस्तदतिशयरूपा बोध्या; सा च द्विविधा चिन्त्याचिन्त्यक्रियाहेतुत्वेन; तत्र चिन्त्यक्रियाहेतुर्या द्रव्य–रसादीनां स्व–स्वकर्माणि स्वभावसिद्धा शक्तिः अचिन्त्यक्रियाहेतुश्च प्रभावापरपर्याया द्रव्याणां रसाद्यननुरूपकार्यकारणशक्तिः । (शि.)

# A.S. & A.H. commentaries

- रस–वीर्य–विपाकानां परस्परसाम्येऽपि यद्यद्विशिष्टं कर्म दृश्यते तत्तत् प्रभावजं विद्धि । एतावतैतदुक्तं भवति – विशिष्टा सर्वातिशायिनी द्रव्यशक्तिः "प्रभाव"–शब्दवाच्या । …. अतः प्रभावस्य तत्स्वभावत्वात् स प्रभावोऽचिन्त्यः कीदृक् कदा कुतस्य इति ज्ञातुं न शक्यते । सदपि तत्कारणं महाभूतविशेषपरिणामाख्यम् अस्मद्विधैः तत्राधिगन्तुं न शक्यत इति अर्थः ।(अ.सं.इन्दु)

- द्वयोर्द्रव्ययो रसादीनां रस–वीर्य–विपाकानां साम्ये सति, यदेकं द्रव्यमन्यत् कर्म कुरुते, अन्यत् पुनरन्यद्विशिष्टं कर्म, तत् प्रभावजं प्रभावाज्जातमिति ज्ञेयम् । अयमस्य द्रव्यस्य प्रभाव इति विशिष्टकर्मकरणान्निश्चीयत इत्यर्थः । ननु, प्रभावः क उच्यते? इति चेद् ब्रूमः– रस–वीर्य–विपाकादिगुणातिशायी स्वभावो यः, स प्रभावः । (अ.हृ./अ.द.)
- द्वयोर्द्रव्ययो रसादिसाम्ये सत्यप्येकस्य यद्विशिष्टं कर्म दृश्यते, तत् प्रभावजम् । (अ.हृ./हे)

# In short

- **Specificity** in Karma (action) is **Prabhava.**
- Prabhava is not Karma.
- Action is produced because of Prabhava.
- It means Prabhava is produced due to specific constitution of Dravya.

# Examples –

- दन्ती रसाद्यैस्तुल्यापि चित्रकस्य विरेचनी ।
  मधुकस्य च मृद्वीका घृतं क्षीरस्य दीपनम् ॥अ.हृ.सू.९/२६

| S.N. | Dravya | Rasa | Vipaka | Virya | Karma due to Prabhava |
|---|---|---|---|---|---|
| 1. | Danti | Katu | Katu | Ushna | Virechana |
| 2. | Chitraka | Katu | Katu | Ushna | - |
| 3. | Madhuka | Madhura | Madhura | Shita | - |
| 4. | Mridvika | Madhura | Madhura | Shita | Virechana |
| 5. | Kshira | Madhura | Madhura | Shita | - |
| 6. | Ghrita | Madhura | Madhura | Shita | Dipana |

# Different examples of Prabhava

- Mani-dharana
- Mantra
- Shalyaharana
- Vamana-virechana
- Medhya
- Agada
- Rakshoghna

# समानप्रत्ययारब्ध & विचित्रप्रत्ययारब्ध

इति सामान्यतः कर्म द्रव्यादीनां, पुनश्च तत् ।
विचित्रप्रत्ययारब्धद्रव्यभेदेन भिद्यते ॥

अ.हृ.सू. 9/28

# समानप्रत्ययारब्ध

- समान+प्रत्यय+आरब्ध
  प्रत्यय = कारण Reason

- यैः एव महाभूतैः रसवीर्यादयो द्रव्याश्रिता आरब्धाः, तैः एव तथा भूतैः तदाश्रयमपि द्रव्यम् । अतः सामान्यतः कर्म द्रव्यादीनामुक्तम् । (अरुणदत्त)

# विचित्रप्रत्ययारब्ध

- विचित्र+प्रत्यय+आरब्ध

- विचित्राश्च ते प्रत्ययाश्च विचित्रप्रत्ययाः नानाकारसन्निवेशविशेषयुक्तानि महाभूतानि, प्रतिसत्त्वं प्राक्तनशुभाशुभकर्मप्रेरितो विचित्रो महाभूतपरिणाम इत्यर्थः ।

- यस्मिन् द्रव्ये रसादीनामन्यानि महाभूतान्यारम्भकाणि द्रव्यस्यचारम्भकाण्यपराणि, तद्द्रव्यं विचित्रप्रत्ययारब्धम्। तदेवं द्रव्याणां द्वैविध्यम् । (अरुणदत्त)

# Hemadri

- विचित्राः–परस्परविलक्षणाः, प्रत्ययाः–कारणभूता महाभूतसङ्घाताः, तैरारब्धं यद्द्रव्यं तस्य भेदो–द्रव्यान्तरविशिष्टत्वम्, तेन।
- पार्थिवाद्यवान्तरसामान्यभेदस्य पूर्वमुक्तत्वात् पुनस्तदित्युक्तम्।एतदुक्तं भवति,–क्वचिद्द्रव्ये यादृगेव भूतसङ्घातो द्रव्यस्यारम्भकः, तदृगेव रसादीनाम्। तत्समानप्रत्ययारब्धम्, तत्सामान्यगुणान्नातिक्रामति।
- क्वचिदन्यादृग्भूतसङ्घातो द्रव्यस्यारम्भकोऽन्यादृग्रसस्यान्यादृक् गुणस्येत्यादि, तद्विचित्रप्रत्ययारब्धम्, तत्सामान्यगुणानतिक्रामति । (हेमाद्रि)

## स्वादुर्गुरुश्च गोधूमो वातजित्वातकृद्यवः ।
## उष्णा मत्स्याः पयः शीतं कटुः सिंहो न शूकरः ॥
## अ.हृ.सू.9/28

- स्वादुरसोपेतो गुरुगुणयुक्तक्तश्च गोधूमो मधुररसोपदिष्टं वातजित्त्वं यत् कर्म तत् करोति, समानप्रत्ययारब्धत्वात्| यवस्तु स्वादुरसोपेतो गुरुगुणयुक्तक्तश्च गोधूमो मधुररसोपदिष्टं यद्वातजित्त्वं कर्म तन्न करोति, अपि तु वातकृत्त्वमेव करोति, विचित्रप्रत्ययारब्धत्वात्|
- मत्स्यः स्वादुरसोपेतो गुरुगुणोपेतश्च न मधुररसोपदिष्टः शीतवीर्यः, किं तर्हि ? उष्णवीर्यः, विचित्रप्रत्ययारब्धत्वात्| क्षीरं च स्वादुरसोपेतं गुरुगुणयुक्तं च मधुररसोपदिष्टं शीतवीर्यम्, समानप्रत्ययारब्धत्वात् |
- स्वादुरसयुक्तो गुरुगुणयुक्तश्च सिंहो न यथारसं मधुरविपाकः, किं तर्हि ? कटुको विपाके, विचित्रप्रत्ययारब्धत्वात्| शूकरो मधुररसयुक्तो गुरुगुणोपेतश्च यथारसं मधुरविपाक एव, समानप्रत्ययारब्धत्वात्|
- एवं यानि समानप्रत्ययारब्धानि द्रव्याणि तेषां रसोपदेशेनैव गुणा निर्दिष्टा भवन्ति|

| S.N. | Dravya | Rasa | Guna | Action/ Virya/ Vipaka | Samana/Vichitra |
|---|---|---|---|---|---|
| 1 | Godhuma | Madhura | Guru | Vatajit | Samana |
| 2 | Yava | Madhura | Guru | Vatakrit | Vicitra |
| 3 | Paya | Madhura | Guru | Shita virya | Samana |
| 4 | Matsya | Madhura | Guru | Ushna virya | Vichitra |
| 5 | Shukara | Madhura | Guru | Madhura vipaka | Samana |
| 6 | Simha | Madhura | Guru | Katu vipaka | Vichitra |

# Arunadatta

- ये च रससंयोगा वक्ष्यमाणास्ते रसादिसमानप्रत्ययारब्धैर्मधुराम्ललवणतिक्तकटुकषायरूपैर्मिथः कल्पनीयाः, न तु विचित्रप्रत्ययारब्धैर्मधुराम्ललवणतिक्तकटुकषायरूपैः| यस्मात्तेषां न यथाशास्त्रनिरूपिता रसवीर्यविपाकादयो विद्यन्ते विचित्रप्रत्ययारब्धवात्| [अतो रसोपदेशव्याप्त्या तैर्द्रव्यैस्ते रससंयोगाः कल्पयितुं न युज्यन्ते|]
- अयं रससंयोगभेद एवंगुणोऽयमेवंगुणः, एवंगुणत्वाच्चामुष्मिन्विषये योज्य एतस्मिन्विषये चायमिति निर्देष्टुं न शक्यते, अनिर्ज्ञातस्वरूपत्वात्| न हि विचित्रप्रत्ययारब्धैर्ये रससंयोगाः क्रियन्ते, तेषां स्वरूपं कथमप्यवधारयितुं शक्यते| अपि च, समानप्रत्ययारब्धैर्ये संयोगाः कल्प्यन्ते, तेषां संयोगिनां वीर्येति यो विरोधः शीतोष्णलक्षणः, स न दोषाय|
- ये तु विचित्रप्रत्ययारब्धैः संयोगाः कल्प्यन्ते, तेषां संयोगिनां यः शीतोष्णलक्षणो विरोधः, स दोषायेति वेद्यम्| अन्यथा रसालापानकादीनामनेकद्रव्यकृतानामनभ्यवहार एव प्राप्नुयात्|
- तथा, त्रयस्त्रिंशद्वर्गा ये वक्ष्यमाणास्तेषु यदयौगिकं तज्जह्यात् यौगिकं त्वनुक्तमपि युञ्ज्यादिति यद्वक्ष्यते तत्र रसादिसमानप्रत्ययारब्धमेव योज्यम्, न विचित्रप्रत्ययारब्धम्| तस्य रसवीर्यविपाकानां निश्चयस्य कर्तुमशक्यत्वात्|

# According to Arunadatta

- Samyoga should be done of Samanapratyayarabdha Dravya because their actions can be explained.

- Same applies to the Shodhanadi Gana explained by Ashtangahridaya.

# Vichitrapratyayarabdha-Prabhava

- VPA – discusses about Virya, Vipaka, Karma of Dravya.

- Prabhava – for explanation of Karma

# Utility

- VPA Dravya – Clinical importance.
- Haritaki
- Amalaki
- Saindhava
- Danti
- Ghrita
- Shunthi

# Thank you!!